# श्री संसार मोहन गणेश कवचं

## विष्णुरुवाच

संसार मोहनस्यास्य कवचस्य प्रजापतिः | ऋषिश्छन्दश्च बृहती देवो लम्बोदरः स्वयम् || १ ||
धर्मार्थ काम मोक्षेषु विनियोगः प्रकीर्तितः | सर्वेषां कवचानां च सारभूतमिदं मुने || २ ||
ॐ गं हुं श्री गणेशाय स्वाहा मे पातु मस्तकम् | द्वात्रिंशदक्षरो मन्त्रो ललाटं मे सदावतु || ३ ||
ॐ ह्रीं क्लीं श्रीं गमिति च संततं पातु लोचनम् | तालुकं पातु विघनेशः संततं धरणीतले || ४ ||
ॐ ह्रीं श्रीं क्लीमिति च संततं पातु नासिकाम् | ॐ गौं गं शूर्पकर्णाय स्वाहा पात्वधरं मम || ५ ||

दन्तानि तालुकां जिह्वां पातु मे षोडशाक्षरः || ६ ||
ॐ लं श्रीं लम्बोदरायेति स्वाहा गण्डं सदावतु | ॐ क्लीं ह्रीं विघन्नाशाय स्वाहा कर्ण सदावतु || ७ ||
ॐ श्रीं गं गजाननायेति स्वाहा स्कन्धं सदावतु | ॐ ह्रीं विनायकायेति स्वाहा पृष्ठं सदावतु || ८ ||
ॐ क्लीं ह्रीमिति कङ्कालं पातु वक्षःस्थलं च गम् | करौ पादौ सदा पातु सर्वाङ्गं विघन्निघन्कृत् ||९||
प्राच्यां लम्बोदरः पातु आगनेय्यां विघन्नायकः | दक्षिणे पातु विघनेशो नैर्ऋत्यां तु गजाननः || १० ||

पश्चिमे पार्वतीपुत्रो वायव्यां शंकरात्मजः | कृष्णस्यांशश्चोत्तरे च परिपूर्णतमस्य च || ११ ||
ऐशान्या मेकदन्त श्च हेरम्बः पातु चोर्ध्वतः | अधो गणाधिपः पातु सर्वपूज्य श्च सर्वतः || १२ ||
स्वप्ने जागरणे चैव पातु मां योगिनां गुरुः || १३ ||
इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् | संसारमोहनं नाम कवचं परमाद्भुतम् || १४ ||
श्री कृष्णेन पुरा दत्तं गोलोके रासमण्डले | वृन्दावने विनीताय मह्यं दिनकरात्मजः || १५ ||

मया दत्तं च तुभ्यं च यस्मै कस्मै न दास्यसि | परं वरं सर्वपूज्यं सर्वसङ्कटतारणम् || १६ ||
गुरुमभ्यर्च्य विधिवत् कवचं धारयेत्तु यः | कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः || १७ ||
अश्वमेधसहस्त्राणि वाजपेयशतानि च | ग्रहेन्द्रकवचस्यास्य कलां नार्हन्ति षोडशीम् || १८ ||
इदं कवचमज्ञात्वा यो भजेच्छंकरात्मजम् | शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः || १९ ||

**|| इति श्री संसार मोहन गणेश स्तोत्रं सम्पूर्णं ||**





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133